National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
**NJHSR 2025;** 1(62): 192-194
© 2025 NJHSR
www.sanskritarticle.com

**Dr. G. Suresh**
Assistant Professor in Sanskrit Sahitya,
The Madras Sanskrit College,
Mylapore, Chennai

**Correspondence:**
**Dr. G. Suresh**
Assistant Professor in Sanskrit Sahitya,
The Madras Sanskrit College,
Mylapore, Chennai

# वैखानसागमोक्तरीत्या शाकफलविधिविवरणम्

## Dr. G. Suresh

**कृते तु मानसं श्रेष्ठं त्रेतायां यजनं परम्।**
**द्वापरे प्रतिमार्चा च कलौ चिन्तनमुत्तमम्॥**
**चतुर्ष्वपि युगेष्वेवं विशेषतस्तु युगे युगे।**
**मन्त्रोच्चारक्रिया द्रव्य-ध्यान-भावाङ्गपञ्चकम्॥**[1]

इति आनन्दसंहिताप्रोक्तरीत्या, कृतयुगे मनसि देवताः विचिन्त्य क्रियमाणाराधनादिकं श्रेष्ठं भवति। त्रेतायुगे यजनमुत्तममितीरितम् । तार्तीयके द्वापरे युगे तु प्रतिमायाः अर्चादिकरणं श्रेष्ठतरं भवति। परन्तु कलियुगे जनसौकर्यार्थं भगवतैव विहितं यत् भगवच्चिन्तनमेव उत्तममिति। एतादृशचतुर्ष्वपि युगेषु प्रतियुगं मन्त्रोच्चार-क्रिया-द्रव्य-ध्यान-भावादिपञ्चकम् अतिमुख्यतमं भवतीति ज्ञायते। अतः यजनं कर्तुं कथं वा भगवद्यागः विधातव्यः, कथमर्चा कर्तव्या, कथम् अग्निसंस्कारादिकं नैवेद्यादिकं कर्तव्यमिति समस्तप्रश्नगुंफानामुत्तरार्थमाश्रयते आगमः एव।

तत्र विष्णुसंबन्धिपूजार्थं वैष्णवागमः वैखानसागमः आगतः, एवञ्च पाञ्चरात्रागमः महाविष्णुना पञ्चरात्रिषु उपदिष्टः - इति कारणात् पाञ्चरात्रं इति अस्यागमस्य नाम। विखना वै विष्णोः जाताः वैखानसाः भवन्ति। तद्वंशि प्रथमो मुनिः वैखानसः। उक्तञ्च -

**विखनावै विष्णोः तज्जा वैखानसा स्मृतः।**
**विष्णुवंशस्व विखना मुनीनां प्रथमो मुनिः।**
**तेनोपदिष्ट यत् सूत्रं तत्सूत्रमुत्तमं स्मृतम्॥**[2]

इति। अयं विष्णोः प्रीतिपात्रभूतः इति अनेन श्लोकेन अवगम्यते -

**अश्वत्थः कपिलागावः तुलसी विखनामुनिः ।**
**चत्वारो मत्प्रिया राजन् तेषां वैखानसो वरः॥**[3]

इति। विखनस् महामुनिपुङ्गवैः अत्रि-भृगृ-मरीचि-कश्यप-वसिष्ठ-पुलह-पुलस्त्य-क्रतु-अङ्गिरस्-इत्येतेभ्यः नवशिष्येभ्यः १५० लक्षसूत्राणि प्रदत्तानि । परन्तु अत्रि-भृगु-मरीचि-काश्यपादिमहर्षिभिः तानि सूत्राणि चतुर्लक्षसूत्राणि प्रोक्तानि । एषैव वैखानससंहिता - इति गीयते ।

एतादृशवैखानसभगवच्छास्त्रे भृगुसंहितायां विद्यमान-त्रयोदश-अधिकारेषु, खिलाधिकारे बहवः अर्चामूर्तेः परार्थपूजार्थम् आत्मार्थपूजार्थं विषयाः चर्चिताः प्रोक्ताश्च सन्ति। अधिकिरेऽस्मिन् प्रथमं "हविषोऽनुब्रूहीति", अर्थात् "**वपायां मेधसो हविषोऽनुब्रूहीति**[4] श्रुत्युक्तप्रकारं हविष्कर्मादिकं, अपि च, शुद्धौदनं, पायसं, कृसरं, गौल्यं, यावकमिति पञ्चविधहविर्विषयादिकञ्च प्रतिपादितं भवति। अत उच्यते -

**शुद्धौदनं पायसञ्च कृसरं गौल्यमेव च ।**

**यावकश्चैव देवानां पञ्चधा हविरुच्यते ॥**[5] इति।

ततः हविरभावे किं धान्यं स्वीकर्तव्यं, किं द्रव्यमाश्रयणीयं, कियत् ग्रहीतव्यमिति प्रमाणविविरणं, इत्यादयः सुविस्तृतं निगद्यते। शालिधान्यं व्रीहिधान्यं शूकधान्यं शिम्बीधान्यं क्षुद्रधान्यम् इति धान्यपञ्चकं विविच्य, तदनन्तरं वर्ज्यधान्यानि गुणादिकञ्च संयगुक्त्वा पञ्चविधहविर्विषयादिकं, ततः पाकार्थमुपयुज्यमान-पात्रादिकं स्पष्टतया प्रदत्तम्।व्यञ्जनानि नैवेद्यार्थं कथं पक्वानि भवेयुः इति विशदयति। यथा -

**हविरेवंविधं प्रोक्तं व्यञ्जनानि भवन्ति च ।**

**कदली बृहतीभेदाः चूतं पनसयुग्मकम् ॥**[6]

इत्येवं रीत्या व्यञ्जनभेदः प्रोच्यते। तत्र व्यञ्जनविषये प्रोक्तं यथा -

**कूष्माण्डं ककुभाण्डञ्च उर्वारुकमतः परम् ।**

**गान्धं नाली च कार्कोटं नारिकेलमर्ककम् ॥**

**कर्कन्धुस्तिन्त्रिणी चैव कारवल्लीविकल्पकम्।**

**मुद्गाढक्यस्तथा भेदः माषा जीरकमेव च॥**

**मसूरं मारिचञ्चैव सर्षपाश्च तथा परे ।**[7]

इति। कूष्माण्डं (Ash gourd), उर्वारुकं (melon cucumber), गान्धं (coriander), नाली (snake gourd) कार्कोटं (teasel gourd), नारिकेलं (coconut), कर्कन्धुः (jujube), तिन्त्रिणी (Tamarind), कारवल्ली (bitter gourd), मुद्ग (Jaggery), माषा (urad), जीरकं (cumin), मसूरं (masoor), मारिचं (chilly), सर्षपाः (mustard seeds) बिंब (ivy gourd), इत्येते भगवन्निवेदार्थमर्हानि विहितानि भवन्ति।

ततः कन्देषु ये स्वीकर्तव्याः इति प्रोच्यन्ते यथा -

**बिम्बमौदुम्बरञ्चैव क्षरसी रक्तहल्लकम्।**

**क्षुद्रकन्दं महाकन्दं कन्दं वै सूरणस्य च।**

**उत्पलस्य च कन्दं वै शकुरस्यार्द्रकस्य च॥**[8]

रक्तहल्लकम् (sweet potato), क्षुद्रकन्दं (yam), महाकन्दं (Colocasia), कन्दं (small yam), उत्पलकन्दं (lotus stem) आर्द्रकन्दं (Wet tubers) इति पूजार्हकन्दविषयाः प्रस्थापिताः भवन्ति। एवं काः वल्लीभ्यः लभ्यमानशाकेषु के देवपाके उपयुज्यन्ते इति दर्शयति यथा -

**वल्ल्यश्चैव महावल्ल्यो नागवल्ल्यस्तथैव च ।**

**मधुवल्ल्यश्च भाण्ड्यश्च वनवल्ल्यश्च संम्भरेत्॥**[9]

महावल्ली (Broad beans), नागवल्ली (Betel leaves), मधुवल्ली (Creeping Spinach) वनवल्ली (wild gourd) भगवदाराधनार्थं विद्यते विहितम्।

समस्तान्यपि व्यञ्जनानि नैवेद्यार्थं न स्वीकर्तव्याः इति धिया वर्ज्यशाकान्यपि प्रदत्तानि, अर्थात् आदानव्यञ्जनं दत्वा हानव्यञ्जनमपि अवश्यं ज्ञेयमिति धिया कथयति। यथा -

**बृहन्मरीचिं शिग्रुञ्च शाकजातिञ्च नीव्रकम्।**

**कोशातकीमलाबुञ्च लशुनादींश्च वर्जयेत्॥**[10]

इति। बृहन्मरीचि (Big pepper), शिग्रु(drumstick), नीव्रकं (palak), कोशातकी (Bottle gourd), अमलाबुः (pumkin), लशुनं (garlic) इत्येतानि वर्ज्यानि।

किञ्च, शाकविषयं सन्दर्शय ग्राह्याग्राह्यफलादीनि सूच्यन्ते। यथा हविर्विवेचनसमये कथं वा अक्षतादिकं स्वीकृत्य कथं प्रक्षाल्य पाकः कार्यः इति प्रतिपादितं, तद्वत् फलविषयेऽपि देवतानिवेदनार्थं यानि उपयुज्यन्ते तानि ग्राह्यफलानि इतराणि अग्राह्यफलानि इति प्रकटितानि भवन्ति। वर्ज्यस्य कारणं भवति यथा अस्माकं गृहे शिशूनाङ्कृते फलदानसमये रम्भाफलमपि त्वगित्यादिकं दूरीकृत्य पक्वफलमेव खादनार्थं दीयते, तद्वत् देवताराधनविषयेऽपि तादृशभावः अत्यावश्यकः इति मत्वा एवं क्रियते यथा सामान्यतया भगवताङ्कृते नारिकेलनिवेदनङ्क्रियते। परन्तु सङ्क्रान्तिपूजासमये दिनमणेः पूजायां बालनारिकेलमेव निवेद्यते इति नियमः, यत्, उक्तमस्ति सूर्याष्टोत्तरे 'लुप्तदन्ताय नमः' इति, दन्तरहितत्वात् तादृशपक्वनारिकेलं निवेदनीयमिति प्रोच्यते। तथैव, भगवतः समस्तमपीष्टमेव। परन्तु यः आराधकः स्वमाराध्यं दैवतं भावपूर्वकः प्रपूजयति, तदा निजशिशुवद्विभाव्य, अथवा आत्मवद्विभाव्य नैवेद्यादिकं विदधाति। तस्मादेव एतानि शाकफलादीनि नैवेद्यार्हानि, एतानि न ग्राह्यानीति जायन्ते।

यथा विनायकस्य कपित्थफलं, श्रीकृष्णस्य जम्बूफलं नवनीतं, सूर्यस्य बदरीफलम् इत्यादिकं कल्पपूजायां प्रोक्तं भवति। तथैव खिलाधिकारे पाकविधौ भगवदाराधनार्थं ग्राह्यफलान्युक्तानि यथा -

**आम्रञ्च पनसज्चैव कदलीफलमेव च।**

**नारिकेलञ्च खर्जूरं द्राक्षा जम्बूफलानि च॥**

**ककुन्दञ्च कपित्थञ्च फलं राजादनस्य च।**

**बदरामलके चैव भव्यं पारावतं तथा॥**

**दाडिमं मातुलुङ्गञ्च देवार्हाणि फलानि वै ।**[11]

इति। आम्रं (mango), पनसं (jackfruit), कदलीफलं (banana), नारिकेलं (Coconut), खर्जूरं(dates), द्राक्षा(grapes), जम्बूफल (jamun), कपित्थं(wood apple) बदरं (jujube fruit), आमलकं (gooseberry), दाडिमं (pomegranate), मातुलुङ्गं (citrus fruit) इत्येतानि देवार्हानि भवन्ति।

तत्र कुत्रचित् मधुरत्वं विद्यमानेऽपि तालफलं निवेदनानर्हं भवतीत्युच्यते। यतः तालसंबद्धाः सर्वथा पूजायामनर्हतामेति। यथा किर्मीरवर्णकुसुमं मनोहार्यपि देवतापूजार्थं गन्धहीनत्वान्नोपयुज्यते, तद्वत् वस्तुस्थित्या मधुरत्वं विद्यतेऽपि तालफलमाराध-नायां नाङ्गीक्रियते।

एवं नारिकेलं कपित्थं बिल्वफलानि बहिरस्थिना साकं न निवेदनीयानि। यत् तेषां बहिः विद्यमानत्वक् कठिनं रूपे विद्यते। तादृशबहिरस्थिना सह दैवताय निवेदनङ्क्रियते चेत्, तन्न समीचीनम्। यथा संपूर्णरूपेण द्राक्षाफलवत् नोपयुज्यते। तथैव स्वस्वामिभावसंबन्धभावेन बहिरस्थ्यादिकं दूरीकृत्यैव निवेदनीयानि। संपूर्णनारिकेलनिवेदनं कुत्रचिद्देवालयेषु अर्धपूजायामेव क्रियते। द्वेधा न कर्तव्यमिति तत्तद्देवालयनियमानुसारम्। परन्तु प्रायशः पूजार्थं नारिकेलं भित्वैव निवेदनीयम्। उक्तञ्च -

**नारिकेलं कपित्थञ्च बिल्वञ्च बहिरस्थिकम् ।**

**अन्तरस्थीनि शेषाणि सर्वाणीति न संशयः ॥**

**क्षालयित्वाऽन्तरस्थीनि बहिरस्थि निरस्य च।**

**निवेदयेद्भगवते तदा तुष्यति केशवः ॥**

**येषामन्तर्बहिश्चास्थि तानि नैव निवेदयेत् ।**

**समुद्धृत्य रसालिं वै पनसस्य निवेदयेत् ॥**[12]

कुत्रचित् येषाञ्चित् फलानां अन्तर्बहिश्चोभयश्चाप्यस्थि विद्यते, तानि नैव निवेदयेत् इति समीर्यते। पनसफलमतीवप्रीतिकरं भगवते। तस्य बहिरन्तरस्थीनि दूरीकृत्य निवेयेदिति प्रोच्यते। अपि च, फलेषु सात्त्विकादिभेदाः निरूप्यन्ते। यथा -

**मधुरं सात्त्विकं प्रोक्तं राजसञ्चाम्लमुच्यते ।**

**तामसं कटुकाषायमिति पक्वं फलं त्रिधा ॥**

**उत्तमं सात्त्विकं प्रोक्तं मध्यमं राजसं फलम् ।**

**अधमं तामसञ्चेति फलभेद उदाहृतः ॥**[13]

तत्तद्रसमाश्रित्य, मधुररसयुक्तानि सात्विकफलानि उत्तमानि, आम्लरसभूतानि मध्यमानि राजसफलानि, कटुकषायानि अन्नानि तामसफलानीत्युक्त्वा, तत्र सात्विकफलान्येव सर्वदा निवेदनीयमिति निगद्यन्ते। एतानि सर्वाणि हविशाकफलानि सभक्तिश्रद्धं निवेद्य भक्तानामेव दद्यादिति प्रसादमाहात्म्यं सूचयति।

तस्मादागमग्रन्थकारोक्तदिशा भगवदाराधनार्थं यद्यन्निवेद्यते सर्वेष्वपि तेषु विहिताविहितादिकं ज्ञात्वा सौमनस्यभावेन सभक्ति-श्रद्धं विधातव्यमित्यवगम्यते।

**इति शम्**

**<u>उद्धृतविषयसूची</u>**

[1]आनन्दसंहिता ४८, ४९

[2]खिलाधिकारः १.९

[3]वैखानसगृह्यसूत्रम् १०६

[4]शतपथब्राह्मणम् ५.१.३.१४

[5]खिलाधिकारः २७.८

[6]तत्रैव २९

[7]तत्रैव ३०-३२

[8]तत्रैव ३३

[9]तत्रैव ३४

[10]तत्रैव ३७

[11]तत्रैव ५१-५३

[12]तत्रैव ५४-५६

[13]तत्रैव ५८-५९

**<u>उपकृतग्रन्थसूची</u>**


1. *खिलाधिकारः*, तिरुमल-तिरुपति देवस्थानम्, तिरुपति, १९९७
2. *आनन्दसंहिता*, तिरुमल-तिरुपति देवस्थानम्, तिरुपति, १९९८
3. *शतपथब्राह्मणम्*, प्राचीनवैज्ञानिकाध्ययन संस्थानम्, नई दिल्लि, १९६७
4. *श्रीवैखानसगृह्यसूत्रम्*, तिरुमल-तिरुपति देवस्थानम्, तिरुपति, १९९७
5. *श्रीमद्भगाद्गीता*, गीता प्रेस्, गोरखपुर्, १९९८
6. *Pā ñcarā trā gama,* By Dr. V. Varadachari, Tirumala Tirupati Devasthanams, Tirupati, 2001